# Ram Raksha Stotra

# राम रक्षा स्तोत्र

## विनियोग:

ॐ अस्य श्रीरामरक्षास्तोत्रमन्त्रस्य बुधकौशिक ऋषिरू श्रीसीता रामचन्द्रो देवता अनुष्टुप्
छन्दरू सीता शक्तिरू श्रीमान् हनुमान् कीलकं श्रीरामचन्द्रप्रीत्यर्थे
रामरक्षास्तोत्रजपे विनियोगरू ।

अथ ध्यानम

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं, पीतं वासो वसानं नवकमल दलस्पर्धिनेत्रं प्रसन्नम् ।
वामांकारूढ़सीतामुखकमलमिलल्लोचनं नीरदाभं नानालंकारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ।

## राम रक्षा स्तोत्र

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातकनाशनम् ।।१।।
ध्यात्वा नीलोत्पलश्याम रामं राजीवलोचनम ।
जानकी लक्ष्मणोपेतं जटामुकुटमण्डितम ।।२।।
सासितूण दृ धनुर्बाणपाणिं नक्तंचरान्तकम ।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम ।।३।।

रामरक्षां पठेत प्राज्ञरू पापघ्नीं सर्वकामदाम ।
शिरो में राघवं पातु भालं दशरथात्मजरू ।।४।।

कौसल्येयो दृशौ पातु विश्वामित्रप्रियरू श्रुती ।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलरू ।।५।।
जिव्हां विद्यानिधि पातु कण्ठं भरतवन्दितरू ।
स्कन्धौ दिव्यायुधरू पातु भुजौ भग्नेशकार्मुकरू ।।६।।
करौ सीतापतिरू पातु हृदयं जामदग्न्यजित ।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयरू ।।७।।

सुग्रीवेशरू कटी पातु सक्थिनी हनुत्मप्रभुरू ।
ऊरू रघूत्तमरू पातु रक्षरूकुलविनाशकृत ।।८।।
जानुनी सेतकृत्पातु जंघे दशमुखान्तकरू ।
पादौ विभीषणश्रीदरू पातु रामोखिलं वपुरू ।।९।।
एतां रामबलोपेतां रक्षां यरू सुकृती पठेत ।
स चिरायुरू सुखी पुत्री विजयी विनयी भवेत ।।१०।।

पातालभूतलव्योमचारिण श्छद्मचारिणरू ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिरू ।।११।।
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ।।१२।।

जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम ।
यरू कण्ठे धारयेत्तस्य करस्थारू सर्वसिद्धयरू ।।१३।।
वज्रपंजरनामेदं यो रामकवचं स्मरेत ।
अव्याहताज्ञरू सर्वत्र लभते जयमंगलम ।।१४।।
आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हररू ।
तथा लिखितवान्प्रातरू प्रबुद्धो बुधकौशिकरू ।।१५।।
आरामरू कल्पवृक्षाणां विरामरू सकलापदाम ।
अभिरामस्त्रिलोकानां रामरू श्रीमान्स नरू प्रभुरू ।।१६।।

तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ।।१७।।
फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ।।१८।।

शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम ।
रक्षरू कुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ।।१९।।
आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ ।
रक्षणाय मम रामलक्ष्मणावग्रतरू पथि सदैव गच्छताम ।।२०।।

सन्नद्धरू कवची खड्गी चापबाणधरो युवा ।
गच्छन्मनोरथान्नश्च रामरू पातु सलक्ष्मणरू ।।२१।।
रामो दाशरथिरू शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थरू पुरुषरू पूणर्रू कौसल्लेयो रघूत्तमरू ।।२२।।
वेदान्तवेद्यो यज्ञेशरू पुराणपुरुषोत्तमरू ।
जानकीवल्लभरू श्रीमानप्रमेयपराक्रमरू ।।२३।।

इत्येतानि जपन्नित्यं मद्भक्तरू श्रद्धयान्वितरू ।
अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न संशयरू ।।२४।।

रामं दूर्वादलश्यामं पद्‌माक्षं पीतवाससम ।
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नरारू ।।२५।।

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुंदरं ।
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम ।।२६।।

राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्ति ।
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम ।।२७।।
रामाय रामभद्राय रामचन्द्राय वेधसे ।रघुनाथय नाथाय सीतायारू पतये नमरू ।।२८।।
श्रीराम राम रघुनन्दन राम
राम श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम ।।२९।।
श्रीरामचन्द्रचरणौ मनसा स्मरामि
श्रीरामचन्द्रवरणौ वचसा गृणामि ।
श्रीरामचन्द्रचरणौ शिरसा नमामि
श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ।।३०।।
माता रामो मत्पिता रामचन्द्ररू
स्वामी रामो मत्सखा रामचन्द्ररू ।
सर्वस्वं मे रामचन्द्रो दयालुर्नान्यं
जाने नैव जाने न जाने ।।३१।।
दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा ।
पुरतो मारुतिर्यस्य तं वन्दे रघुनंदनम ।।३२।।
लोकाभिरामं रणरंगधीरं राजीवनेत्र रघुवंशनाथम ।
कारुण्यरुपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये ।।३३।।
मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ।।३४।।
कूजन्तं रामरामेति मधुरं मधुराक्षरम ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम ।।३५।।

आपदामपहर्तारं दातारं सर्वसम्पदाम ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम ।।३६।।

भर्जनं भवबीजानामर्जनं सुखसम्पदाम । ¯ तर्जनं यमदूतानां रामरामेति गर्जनम ।।३७।।

रामो राजमणिरू सदा विजयते रामं रमेशं भजे,
रामेणाभिहता निशाचरचमू, रामाय तस्मै नमरू ।
रामान्नास्ति परायणं परतरं रामस्य दासोस्म्यहं,
रामे चित्तलयरू सदा भवतु मे भो राम मामुद्धर ।।३८।।

राम रामेति रामेति रमे रामे मनोरमे ।
सहस्त्र नाम तत्तुल्यं रामनाम वरानने ।।३९।।
॥ इति रामरक्षास्तोत्र संपूर्णम् ॥